

॥ श्रीगुरुभ्यो नमः ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

## द्वितीयकाण्डे चतुर्थः प्रश्नः

### इष्टिविधानं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

देवा मनुष्याः पितरस्तेऽन्यत आसन्नसुरा रख्षाꣳसि पिशाचास्तेऽन्यतस्तेषान्देवानामुत यदल्पँल्लोहितमकुर्वन् तद्रख्षाꣳसि रात्रीभिरसुभ्नन् तान्थ् सुब्धान् मृतानभि व्यौच्छत् ते देवा अविदुर्यो वै नोऽयम्म्रियते रख्षाꣳसि वा इमं(२) घ्नन्तीति ते रख्षाꣳस्युपामन्त्रयन्त तान्यब्रुवन् वरँव्वृणामहै य ॥ [१] ॥ दसुरान् जयाम तन्नः सहासदिति ततो वै देवा असुरानजयन् तेऽसुरान् जित्वा रख्षाꣳस्यपानुदन्त तानि रख्षाꣳस्यनृतमकर्तेति समन्तन्देवान् पर्यविशन् ते देवा अग्नावनाथन्त तेऽग्नये प्रवते पुरोडाशमष्टाकपालन्निरवपन्नग्नये विबाधवतेऽग्नये प्रतीकवते यदग्नये प्रवते निरवपन्यान्येव पुरस्ताद्रख्षाꣳस्या ॥ [२] ॥ सन्तानि तेन प्राणुदन्त यदग्नये विबाधवते यान्येवाभितो रख्षाꣳस्यासन् तानि तेन व्यबाधन्त यदग्नये प्रतीकवते यान्येव पश्चाद्रख्षाꣳस्यासन् तानि तेनापानुदन्त ततो देवा अभवन् परासुरा यो भ्रातृव्यवान्थ् स्याथ् स स्पर्द्धमान एतयेष्ट्या यजेताग्नये प्रवते पुरोडाशमष्टाकपालन्निर्वपेदग्नये विबाधवते ॥ [३] ॥ ऽग्नये प्रतीकवते यदग्नये प्रवते निर्वपति य एवास्माच्छ्रेयान्भ्रातृव्यस्तन्तेन प्र णुदते यदग्नये विबाधवते य एवैनेन सदृङ् तन्तेन वि बाधते यदग्नये प्रतीकवते य एवास्मात् पापीयान् तन्तेनाप नुदते प्र श्रेयाꣳसम्भ्रातृव्यन्नुदतेऽति सदृशङ्क्रामति नैनम्पापीयानाप्नोति य एवँव्विद्वानेतयेष्ट्या यजते ॥ [४] ॥

(वृणामहै यत् पुरस्ताद् रख्षाꣳसि वपेदग्नये विबाधवत एवं चत्वारि च) ॥ १ ॥

देवासुराः सय्ँत्ता आसन् ते देवा अब्रुवन्यो नो वीर्यावत्तमस्तमनु समारभामहा इति त इन्द्रमब्रुवन् त्वव्ँवै नो वीर्यावत्तमोऽसि त्वामनु समारभामहा इति सोऽब्रवीत् तिस्रो म इमास्तनुवो वीर्यावतीस्ताः प्रीणीताथासुरानभि भविष्यथेति ता वै ब्रूहीत्यब्रुवन्निय मꣳहोमुगियव्ँविमृधेयमिन्द्रियावती ॥ [५] ॥ त्यब्रवीत्त इन्द्रायाꣳहोमुचे पुरोडाशमेकादशकपालन्निरवपन्निन्द्राय वैमृधायेन्द्रायेन्द्रियावते यदिन्द्रायाꣳहोमुचे निरवपन्नꣳहस एव तेनामुच्यन्त यदिन्द्राय वैमृधाय मृध एव तेनापाघ्नत यदिन्द्रायेन्द्रियावत इन्द्रियमेव तेनाऽऽ*त्मन्नदधत त्रयस्त्रिꣳशत्कपालम्पुरोडाशन्निरवपन् त्रयस्त्रिꣳशद्वै देवतास्ता इन्द्र आत्मन्ननु समारभयत भूत्यै ॥ [६] ॥ ताव्ँवाव देवा विजितिमुत्तमामसुरैर् व्यजयन्त यो भ्रातृव्यवान्थ्स्यात्थ् स स्पर्द्धमान एतयेष्ट्या यजेतेन्द्रायाꣳहोमुचे पुरोडाशमेकादशकपालन्निर्वपेदिन्द्राय वैमृधायेन्द्रायेन्द्रियावतेऽꣳहसा वा एष गृहीतो यस्माच्छ्रेयान् भ्रातृव्यो यदिन्द्रायाꣳहोमुचे निर्वपत्यꣳहस एव तेन मुच्यते मृधा वा एषोऽभिषण्णो यस्मात्थ् समानेष्वन्यः श्रेयानुता ॥ [७] ॥ ऽभ्रातृव्यो यदिन्द्राय वैमृधाय मृध एव तेनाप हते यदिन्द्रायेन्द्रियावत इन्द्रियमेव तेनात्मन् धत्ते त्रयस्त्रिꣳशत्कपालम्पुरोडाशन्निर्वपति त्रयस्त्रिꣳशद्वै देवतास्ता एव यजमान आत्मन्ननु समारभयते भूत्यै सा वा एषा विजितिर् नामेष्टिर् य एवव्ँविद्वानेतयेष्ट्या यजत उत्तमामेव विजितिम्भ्रातृव्येण वि जयते ॥ [८] ॥

(इन्द्रियावती भूत्या उतै कान्नपञ्चाशच्च) ॥ २ ॥

देवासुराः सय्ँत्ता आसन् तेषाङ्गायत्र्योजो बलमिन्द्रियव्ँवीर्यम्प्रजाम्पशून्थ् संगृह्या *ऽऽदायापक्रम्यातिष्ठत् तेऽमन्यन्त यतरान्वा इयमुपावर्थ्स्यति त इदम्भविष्यन्तीति ताव्ँव्यह्वयन्त विश्वकर्मन्निति देवा दाभीत्यसुराः सा नान्यतराꣳश्च नोपावर्तत ते देवा एतद् यजुरपश्यन्नोजोऽसि सहोऽसि बलमसि ॥ [९] ॥ भ्राजोऽसि देवानान्धाम नामाऽसि विश्वमसि विश्वायुः सर्वमसि सर्वायुरभिभूरिति वाव देवा असुराणामोजो बलमिन्द्रियव्ँवीर्यम्प्रजाम्पशूनवृञ्जत यद्गायत्र्यपक्रम्यातिष्ठत् तस्मादेताङ्गायत्रीतीष्टिमाहुः सव्ँवथ्सरो वै गायत्री सव्ँवथ्सरो वै तदपक्रम्यातिष्ठद्यदेतया देवा असुराणामोजो बलमिन्द्रियव्ँवीर्यं ॥ [१०] ॥ प्रजाम्पशूनवृञ्जत तस्मादेताꣳ सव्ँवर्ग

इतीष्टिमाहुर्यो भ्रातृव्यवान्थ् स्याथ् स स्पर्द्धमान एतयेष्ट्या यजेताग्नये सँव्वर्गाय पुरोडाशमष्टा-कपालन्निर्वपेत् तꣳ शृतमासन्नमेतेन यजुषाऽभि मृशेदोज एव बलमिन्द्रियँव्वीर्यम्प्रजां पशून् भ्रातृव्यस्य वृङ्क्ते भवत्यात्मना परास्य भ्रातृव्यो भवति ॥ [११] ॥

(बलमस्येतया देवा असुराणामोजो बलमिन्द्रियँव्वीर्यंपञ्चचत्वारिꣳशच्च) ॥ ३ ॥

---

प्रजापतिः प्रजा असृजत ता अस्माथ् सृष्टाः पराचीरायन् ता यत्रावसन् ततो गर्मुदुदतिष्ठत् ता बृहस्पतिश्चान्ववैताꣳ सोऽब्रवीद् बृहस्पतिरनया त्वा प्र तिष्ठान्यथ त्वा प्रजा उपावर्थ्स्यन्तीति तम्प्रातिष्ठत् ततो वै प्रजापतिम्प्रजा उपावर्तन्त यः प्रजाकामः स्यात् तस्मा एतम्प्राजापत्यङ्गार्मु-तञ्चरुन्निर्वपेत् प्रजापति ॥ [१२] ॥ मेव स्वेन भागधेयेनोप धावति स एवास्मै प्रजाम्प्र जनयति प्रजापतिः पशूनसृजत तेऽस्माथ् सृष्टाः पराञ्च आयन् ते यत्रावसन् ततो गर्मुदुदतिष्ठत् तान् पूषा चान्ववैताꣳ सोऽब्रवीत् पूषाऽनया मा प्र तिष्ठाथ त्वा पशव उपावर्थ्स्यन्तीति माम्प्र तिष्ठेति सोमोऽब्रवीन् मम वा ॥ [१३] ॥ अकृष्टपच्यमित्युभौ वाम्प्र तिष्ठानीत्यब्रवीत् तौ प्रातिष्ठत् ततो वै प्रजापतिम्पशव उपावर्तन्त यः पशुकामः स्यात् तस्मा एतꣳ सोमापौष्णङ्गार्मुतञ्चरुन्निर्वपेथ् सोमापूषणावेव स्वेन भागधेयेनोप धावति तावेवास्मै पशून् प्र जनयतः सोमो वै रेतोधाः पूषा पशूनाम्प्रजनयिता सोम एवास्मै रेतो दधाति पूषा पशून् प्र जनयति ॥ [१४] ॥

(वपेत् प्रजापतिंवैदधाति पूषा त्रीणि च) ॥ ४ ॥

---

अग्ने गोभिर् न आ गहीन्दो पुष्ट्या जुषस्व नः। इन्द्रो धर्ता गृहेषु नः॥ सविता यः सह-स्त्रियः स नो गृहेषु रारणत्। आ पूषा एत्वा वसु॥ धाता ददातु नो रयिमीशानो जगतस्पतिः। स नः पूर्णेन वावनत्॥ त्वष्टा यो वृषभो वृषा स नो गृहेषु रारणत्। सहस्रेणायुतेन च॥ येन देवा अमृतं ॥ [१५] ॥ दीर्घꣳ श्रवो दिव्यैरयन्त। रायस्पोष त्वमस्मभ्यङ्गवाङ्कुल्मिञ्जी-वस आ युवस्व॥ अग्निर् गृहपतिः सोमो विश्ववनिः सविता सुमेधाः स्वाहा॥ अग्ने गृहपते

यस्ते घृत्यो भागस्तेन सह ओज आक्रममाणाय धेहि श्रैष्ठ्यात् पथो मा योषम्मूर्द्धा भूयासङ्ग्ं स्वाहा ॥ [१६] ॥

(अमृतमष्टात्रिꣳशच्च) ॥ ५ ॥

चित्रया यजेत पशुकाम इयँवै चित्रा यद्वा अस्याँविश्वम्भूतमधि प्रजायते तेनेयञ्चित्रा य एवँविद्वाङ्ग्ं श्चित्रया पशुकामो यजते प्र प्रजया पशुभिर् मिथुनैर् जायते प्रैवाऽऽग्नेयेन वापयति रेतः सौम्येन दधाति रेत एव हितन्त्वष्टा रूपाणि वि करोति सारस्वतौ भवत एतद्वै दैव्यम्मिथु-नन्दैव्यमेवास्मै ॥ [१७] ॥ मिथुनम्मद्ध्यतो दधाति पुष्ट्यै प्रजननाय सिनीवाल्यै चरुर् भवति वाग्वै सिनीवाली पुष्टिः खलु वै वाक् पुष्टिमेव वाचमुपैत्यैन्द्र उत्तमो भवति तेनैव तन्मिथुनꣳ सप्तै-तानि हवीꣳषि भवन्ति सप्त ग्राम्याः पशवः सप्तारण्याः सप्त छन्दाङ्ग्ंस्युभयस्यावरुद्ध्या अथैता आहुतीर् जुहोत्येते वै देवाः पुष्टिपतयस्त एवा स्मिन् पुष्टिन्दधति पुष्यति प्रजया पशुभिरथो यदेता आहुतीर् जुहोति प्रतिष्ठित्यै ॥ [१८] ॥

(अस्मै त एव द्वादश च) ॥ ६ ॥

मारुतमसि मरुतामोजोऽपान्धाराम्भिन्धि रमयत मरुतः श्येनमायिनम्मनोजव सँवृषणꣳ सुवृक्तिम्॥ येन शर्द्ध उग्रमवसृष्टमेति तदश्विना परि धत्तङ्ग्ं स्वस्ति। पुरोवातो वर्षञ्जिन्वरावृथ् स्वाहा वातावद्वर्षन्नुग्ररावृथ् स्वाहा स्तनयन् वर्षन् भीमरावृथ् स्वाहाऽनशन्यवस्फूर्जन्दिद्युद्व-र्षन्त्वेषरावृथ् स्वाहाऽतिरात्रँवर्षन् पूर्तिरावृथ् ॥ [१९] ॥ स्वाहा बहु हायमवृषादिति श्रुत-रावृथ् स्वाहाऽऽतपति वर्षन् विराडावृथ् स्वाहाऽवस्फूर्जन् दिद्युद्वर्षन्भूतरावृथ् स्वाहा मान्दा वाशाः शुन्ध्यूरजिराः। ज्योतिष्मतीस्तमस्वरीरुन्दतीः सुफेनाः। मित्रभृतः क्षत्रभृतः सुराष्ट्रा इह माऽवत॥ वृष्णो अश्वस्य सन्दानमसि वृष्ट्यै त्वोप नह्यामि ॥ [२०] ॥

(पूर्तिरावृद् द्विचत्वारिꣳशच्च) ॥ ७ ॥

देवा वसव्या अग्ने सोम सूर्य॥ देवाः शर्मण्या मित्रावरुणाऽर्यमन्न्॥ देवाः सपीतयोऽपान्न्-पादाशुहेमन्न्। उद्नो दत्तोदधिम्भिन्त दिवः पर्जन्यादन्तरिक्षात् पृथिव्यास्ततो नो वृष्ट्याऽवत॥ दिवा चित् तमः कृण्वन्ति पर्जन्येनोदवाहेन। पृथिवीय्ँव्युन्दन्ति॥ आ यन्नरः सुदानवो ददाशुषे दिवः कोशमचुच्यवुः॥ वि पर्जन्याः सृजन्ति रोदसी अनु धन्वना यन्ति ॥ [२१] ॥ वृष्टयः। उदीरयथा मरुतः समुद्रतो यूयव्ँवृष्टिव्ँवर्षयथा पुरीषिणः। न वो दस्रा उप दस्यन्ति धेनवः शुभय्ँयातामनु रथा अवृत्सत॥ सृजा वृष्टिन्दिव आऽद्भिः समुद्रम्पृण॥ अब्जा असि प्रथमजा बलमसि समुद्रियम्॥ उन्नंभय पृथिवीम्भिन्धीदन्दिव्यन्नभः। उद्नो दिव्यस्य नो देही-शानो वि सृजा दृतिम्॥ ये देवा दिविभागा येऽन्तरिक्षभागा ये पृथिविभागाः। त इमय्ँयज्ञम-वन्तु त इदङ्क्षेत्रमा विशन्तु त इदङ्क्षेत्रमनु वि विशन्तु ॥ [२२] ॥

(यन्ति देवा विꣳशतिश्च) ॥ ८ ॥

मारुतमसि मरुतामोज इति कृष्णव्ँवासः कृष्णतूषम्परि धत्त एतद्वै वृष्ट्यै रूपꣳ सरूप एव भूत्वा पर्जन्यव्ँवर्षयति रमयत मरुतः श्येनमायिनमिति पश्चाद्वातम्प्रति मीवति पुरोवातमेव जनयति वर्षस्यावरुद्ध्यै वातनामानि जुहोति वायुर् वै वृष्ट्या ईशे वायुमेव स्वेन भागधेयेनोप धावति स एवास्मै पर्जन्यव्ँवर्षयत्यष्टौ ॥ [२३] ॥ जुहोति चतस्रो वै दिशश्चतस्रोऽवान्तर-दिशा दिग्भ्य एव वृष्टिꣳ सम्प्र च्यावयति कृष्णाजिने सय्ँयौति हविरेवाकरन्तर्वेदि सय्ँयौत्यव-रुद्ध्यै यतीनामद्यमानानाꣳ शीर्षाणि पराऽपतन् ते खर्जूरा अभवन् तेषाꣳ रस ऊर्ध्वोऽपतत् तानि करीराण्यभवन्थ् सौम्यानि वै करीराणि सौम्या खलु वा आहुतिर् दिवो वृष्टिञ्च्यावयति यत् करीराणि भवन्ति ॥ [२४] ॥ सौम्ययैवाऽऽ*हुत्या दिवो वृष्टिमव रुन्धे मधुषा सय्ँयौत्य-पाव्ँवा एष ओषधीनाꣳ रसो यन्मदध्वद्भ्य एवौषधीभ्यो वर्षत्यथो अद्भ्य एवौषधीभ्यो वृष्टिन्नि नयति मान्दा वाशा इति सय्ँयौति नामधेयैरेवैना अच्छैत्यथो यथा ब्रूयादसा वेहीत्येवमेवैना नामधेयैरा ॥ [२५] ॥ च्यावयति वृष्णो अश्वस्य सन्दानमसि वृष्ट्यै त्वोप नह्यामीत्याह वृषा वा अश्वो वृषा पर्जन्यः कृष्ण इव खलु वै भूत्वा वर्षति रूपेणैवैनꣳ समर्द्धयति वर्षस्या वरुद्ध्यै ॥ [२६] ॥

(अष्टौ भवन्ति नामधेयैरै कान्नत्रिꣳशच्च) ॥ ९ ॥

देवा वसव्या देवाः शर्मण्या देवाः सपीतय इत्या बद्ध्नाति देवताभिरेवान्वहं वृष्टिमिच्छति
यदि वर्षेत् तावत्येव होतव्यँय्यदि न वर्षेच्छ्वो भूते हविर् निर्वपेदहोरात्रे वै मित्रावरुणावहो-
रात्राभ्याङ्खलु वै पर्जन्यो वर्षति नक्तँव्वा हि दिवा वा वर्षति मित्रावरुणावेव स्वेन भागधेये-
नोप धावति तावेवास्मा ॥ [२७] ॥ अहोरात्राभ्याम्पर्जन्यँव्वर्षयतोऽग्नये धामच्छदे पुरोडा-
शमष्टाकपालन्निर्वपेन्मारुतꣳ सप्तकपालꣳ सौर्यमेककपालमग्निर् वा इतो वृष्टिमुदीरयति मरुतः
सृष्टान्नयन्ति यदा खलु वा असावादित्यो न्यङ् रश्मिभिः पर्यावर्ततेऽथ वर्षति धामच्छदिव खलु
वै भूत्वा वर्षत्येता वै देवता वृष्ट्या ईशते ता एव स्वेन भागधेयेनोप धावति ता ॥ [२८] ॥
एवास्मै पर्जन्यँव्वर्षयन्त्युतावर्षिष्यन् वर्षत्येव सृजा वृष्टिन्दिव आ*ऽद्भिः समुद्रम्पृणेत्या-
हेमाश्चैवामूश्चापः समर्द्धयत्यथो आभिरेवामूरच्छैत्यब्जा असि प्रथमजा बलमसि समुद्रियमि-
त्याह यथायजुरेवैतदुन्नम्भय पृथिवीमिति वर्षाह्वाञ्जुहोत्येषा वा ओषधीनाँव्वृष्टिवनिस्तयैव वृष्टिमा
च्यावयति ये देवा दिविभागा इति कृष्णाजिनमव धूनोतीम एवास्मै लोकाः प्रीता अभीष्टा
भवन्ति ॥ [२९] ॥

(अस्मै धावति ता वा एकविꣳशतिश्च) ॥ १० ॥

सर्वाणि छन्दाꣳस्येतस्यामिष्ट्यामनूच्यानीत्याहुस्त्रिष्टुभो वा एतद्वीर्यँय्यत् ककुदुष्णिहा जगत्यै
यदुष्णिहककुभावन्वाह तेनैव सर्वाणि छन्दाꣳस्यव रुन्धे गायत्री वा एषा यदुष्णिहा यानि चत्वा-
र्यद्ध्यक्षराणि चतुष्पाद एव ते पशवो यथा पुरोडाशे पुरोडाशोऽद्ध्येवमेव तद्यदृच्यद्ध्यक्षराणि
यज्जगत्या ॥ [३०] ॥ परिदद्ध्यादन्तँय्यज्ञङ्गमयेत् त्रिष्टुभा परि दधातीन्द्रियँव्वै वीर्यन्त्रिष्टुगि-
न्द्रिय एव वीर्ये यज्ञम्प्रति ष्ठापयति नान्तङ्गमयत्यग्ने त्री ते वाजिना त्री षधस्थेति त्रिवत्या परि
दधाति सरूपत्वाय सर्वो वा एष यज्ञो यत् त्रैधातवीयङ्कामायकामाय प्र युज्यते सर्वेभ्यो हि
कामेभ्यो यज्ञः प्रयुज्यते त्रैधातवीयेन यजेताभिचरन्थ् सर्वो वा ॥ [३१] ॥ एष यज्ञो यत् त्रैधा-
तवीयꣳ सर्वेणैवैनँय्यज्ञेनाभि चरति स्तृणुत एवैनमेतयैव यजेताभिचर्यमाणः सर्वो वा एष यज्ञो

यत् त्रैधातवीयꣳ सर्वेणैव यज्ञेन यजते नैनमभिचरन्थ् स्तृणुत एतयैव यजेत सहस्रेण यक्ष्यमाणः प्रजातमेवैनद् ददात्येतयैव यजेत सहस्रेणेजानोऽन्तँव्वा एष पशूनाङ्गच्छति ॥ [३२] ॥ यः सहस्रेण यजते प्रजापतिः खलु वै पशूनसृजत ताꣳस्त्रैधातवीयेनैवासृजत य एवँव्विद्वाꣳस्त्रैधातवीयेन पशुकामो यजते यस्मादेव योनेः प्रजापतिः पशूनसृजत तस्मादेवैनान्थ् सृजत उपैनमुत्तरꣳ सहस्रन्नमति देवताभ्यो वा एष आ वृश्च्यते यो यक्ष्य इत्युक्त्वा न यजते त्रैधातवीयेन यजेत सर्वो वा एष यज्ञो ॥ [३३] ॥ यत् त्रैधातवीयꣳ सर्वेणैव यज्ञेन यजते न देवताभ्य आ वृश्च्यते द्वादशकपालः पुरोडाशो भवति ते त्रयश्चतुष्कपालास्त्रिषमृद्धत्वाय त्रयः पुरोडाशा भवन्ति त्रय इमे लोका एषाँल्लोकानामाप्त्या उत्तरौत्तरो ज्यायान् भवत्येवमिव हीमे लोका यवमयो मद्ध्य एतद्वा अन्तरिक्षस्य रूपꣳ समृद्ध्यै सर्वेषामभिगमयन्नव द्यत्यछंबद्धारꣳ हिरण्यन्ददाति तेज एवा ॥ [३४] ॥ ऽव रुन्धे ताप्र्यन्ददाति पशूनेवाव रुन्धे धेनुन्ददात्याशिष एवाव रुन्धे साम्नो वा एष वर्णो यद्धिरण्यय्यँजुषान्ताप्र्यमुक्थामदानान्धेनुरेतानेव सर्वान्वर्णानव रुन्धे ॥ [३५] ॥

(जगत्या ऽभिचरन्थ् सर्वो वै गच्छति यज्ञ स्तेज एव त्रिꣳशच्च) ॥ ११ ॥

त्वष्टा हतपुत्रो वीन्द्रꣳ सोममाऽहरत् तस्मिन्निन्द्र उपहवमैच्छत तन्नोपाह्वयत पुत्रम्मेऽवधीरिति स यज्ञवेशसङ्कृत्वा प्रासहा सोममपिबत् तस्य यदत्यशिष्यत तत् त्वष्टाऽऽहवनीयमुप प्रावर्तयथ् स्वाहेन्द्रशत्रुर्वर्द्धस्वेति स यावदूर्द्ध्वः पराविद्ध्यति तावति स्वयमेव व्यरमत यदि वा तावत् प्रवण ॥ [३६] ॥ मासीद्यदि वा तावदद्ध्यग्नेरासीथ् स संभवन्न ग्नीषोमावभि समभवथ् स इषुमात्रमिषुमात्रव्विष्वङ्ङवर्द्धत स इमाँल्लोकानवृणोद्यदिमाँल्लोकानवृणोत् तद्वृत्रस्य वृत्रत्वन्तस्मादिन्द्रोऽबिभेदपि त्वष्टा तस्मै त्वष्टा वज्रमसिञ्चत् तपो वै स वज्र आसीत् तमुद्यन्तुन्नाशक्नोदथ वै तर्हि विष्णु ॥ [३७] ॥ रन्या देवताऽऽसीथ् सोऽब्रवीद्विष्णवेहीदमा हरिष्यावो येनायमिदमिति स विष्णुस्त्रेधाऽऽत्मानव्वि न्यधत्त पृथिव्यान्तृतीयमन्तरिक्षे तृतीयन्दिवि तृतीयमभिपर्यावर्ताद्ध्यबिभेद्यत्पृथिव्यान्तृतीयमासीत् तेनेन्द्रो वज्रमुदयच्छद्विष्ण्वनुस्थितः सोऽब्रवीन्मा मे प्र हारस्ति वा इदं ॥ [३८] ॥ मयि वीर्यन्तत् ते प्र दास्यामीति तदस्मै प्रायच्छत् तत् प्रत्य-

गृह्णादधा मेति तद्विष्णवेऽति प्रायच्छत् तद् विष्णुः प्रत्यगृह्णादस्मास्विन्द्र इन्द्रियन्दधात्विति यदन्तरिक्षे तृतीयमासीत् तेनेन्द्रो वज्रमुदयच्छद्विष्ण्वनुस्थितः सोऽब्रवीन्मा मे प्र हारस्ति वा इदं ॥ [३९] ॥ मयि वीर्यन्तत् ते प्र दास्यामीति तदस्मै प्रायच्छत् तत् प्रत्यगृह्णाद् द्विर् माऽधा इति तद्विष्णवेऽति प्रायच्छत् तद्विष्णुः प्रत्यगृह्णादस्मास्विन्द्र इन्द्रियन्दधात्विति यद्दिवि तृतीयमासीत् तेनेन्द्रो वज्रमुदयच्छद् विष्ण्वनुस्थितः सोऽब्रवीन्मा मे प्र हार् येनाह ॥ [४०] ॥ मिदमस्मि तत् ते प्र दास्यामीति त्वी(३) इत्यब्रवीथ् सन्धान्तु सन्दधावहै ꣳ त्वामेव प्रविशानीति यन्माम्प्रविशेः किम्मा भुञ्ज्या इत्यब्रवीत् त्वामेवेन्धीय तव भोगाय त्वाम्प्रविशेयमित्यब्रवीत् तवँवृत्रः प्राविशदुदरँवै वृत्रः क्षुत् खलु वै मनुष्यस्य भ्रातृव्यो य ॥ [४१] ॥ एवँवेद हन्ति क्षुधम्भ्रातृव्यन्तदस्मै प्रायच्छत् तत् प्रत्यगृह्णात्त्रिर् माऽधा इति तद्विष्णवेऽति प्रायच्छत् तद्विष्णुः प्रत्यगृह्णादस्मास्विन्द्र इन्द्रियन्दधात्विति यत्त्रिः प्रायच्छत् त्रिः प्रत्यगृह्णात् तत् त्रिधातोस्त्रिधातुत्वयँयद्विष्णुरन्वतिष्ठत विष्णवेऽति प्रायच्छत् तस्मादैन्द्रावैष्णवꣳ हविर्भवति यद्वा इदङ्किञ्च तदस्मै तत् प्रायच्छद् ऋचः सामानि यजूꣳषि सहस्रँवा अस्मै तत् प्रायच्छत् तस्माथ् सहस्रदक्षिणम् ॥ [४२] ॥

(प्रवणं विष्णुर् वा इद मिद महँयो भव त्येकविꣳशतिश्च) ॥ १२ ॥

---

देवा वै राजन्याज्जायमानादबिभयुस्तमन्तरेव सन्तन्दाम्नाऽपौम्भन्थ् स वा एषोऽपोब्धो जायते यद्राजन्यो यद्वा एषोऽनपोब्धो जायेत वृत्रान् घ्नꣳश्चरेद्यङ्कामयेत राजन्यमनपोब्धो जायेत वृत्रान् घ्नꣳश्चरेदिति तस्मा एतमैन्द्राबार्हस्पत्यञ्चरुन्निर्वपेदैन्द्रो वै राजन्यो ब्रह्म बृहस्पतिर् ब्रह्मणैवैनन्दाम्नोऽपोम्भनान् मुञ्चति हिरण्मयन्दाम दक्षिणा साक्षादेवैनन्दाम्नोऽपोम्भनान् मुञ्चति ॥ [४३] ॥

(एनं द्वादश च) ॥ १३ ॥

---

नवोनवो भवति जायमानोऽह्नाङ्केतुरुषसामेत्यग्रे। भागन्देवेभ्यो वि दधात्यायन् प्र चन्द्रमास्तिरति दीर्घमायुः॥ यमादित्या अꣳशुमाप्याययन्ति यमक्षितमक्षितयः पिबन्ति। तेन नो

राजा वरुणो बृहस्पतिरा प्याययन्तु भुवनस्य गोपाः॥ प्राच्यान्दिशि त्वमिन्द्रासि राजोतोदीच्याँवृत्रहन् वृत्रहाऽसि। यत्र यन्ति स्रोत्यास्त ॥ [४४] ॥ जितन्ते दक्षिणतो वृषभ एधि हव्यः॥ इन्द्रो जयाति न परा जयाता अधिराजो राजसु राजयाति। विश्वा हि भूयाः पृतना अभिष्टीरुपसद्यो नमस्यो यथाऽसत्॥ अस्येदेव प्र रिरिचे महित्वन्दिवः पृथिव्याः पर्यन्तरिक्षात्। स्वराडिन्द्रो दम आ विश्वगूर्तः स्वरिरमत्रो ववक्षे रणाय॥ अभि त्वा शूर नोनुमोऽदुग्धा इव धेनवः। ईशान ॥ [४५] ॥ मस्य जगतः सुवर्दृशमीशानमिन्द्र तस्थुषः॥ त्वामिद्धि हवामहे साता वाजस्य कारवः। त्वाँवृत्रेष्विन्द्र सत्पतिन्नरस्त्वाङ्काष्ठास्वर्वतः॥ यद् द्याव इन्द्र ते शतꣳ शतम्भूमीरुत स्युः। न त्वा वज्रिन्थ्सहस्रꣳ सूर्या अनु न जातमष्ट रोदसी॥ पिबा सोममिन्द्र मन्दतु त्वा यन्ते सुषाव हर्यश्वाद्रिः ॥ [४६] ॥ सोतुर् बाहुभ्याꣳ सुयतो नार्वा॥ रेवतीर् नः सधमाद इन्द्रे सन्तु तुविवाजाः। क्षुमन्तो याभिर् मदेम॥ उदग्ने शुचयस्तव>१, वि ज्योतिषो>२,दु त्यञ्जातवेदसꣳ>३, सप्त त्वा हरितो रथे वहन्ति देव सूर्य। शोचिष्केशव्विचक्षण॥ चित्रन्देवानामुदगादनीकञ्चक्षुर् मित्रस्य वरुणस्याऽग्नेः। आऽप्रा द्यावापृथिवी अन्तरिक्षꣳ सूर्य आत्मा जगतस्तस्थुष ॥ [४७] ॥ श्च॥ विश्वे देवा ऋतावृध ऋतुभिर्हवनश्रुतः। जुषन्ताय्युँज्यम्पयः॥ विश्वे देवाः शृणुतेमꣳ हवम्मे ये अन्तरिक्षे य उप द्यवि ष्ठ। ये अग्निजिह्वा उत वा यजत्रा आसद्यास्मिन् बर्हिषि मादयद्ध्वम् ॥ [४८] ॥

(त दीशान मद्रि स्तस्थुष स्त्रिꣳशच्च) ॥ १४ ॥

## समाप्ति कोर्वैः

(देवा मनुष्या देवासुरा अब्रुवन् देवासुरास्तेषाङ्गायत्री प्रजापतिस्ता यत्रा ग्ने गोभिः चित्रया मारुतं देवा वसव्या अग्ने मारुतमिति देवा वसव्या देवाः शर्मण्याः सर्वाणि त्वष्टा हतपुत्रो देवा वै राजन्यान् नवोनव श्चतुर्दश)

(देवा मनुष्याः प्रजाम्पशून् देवा वसव्याः परिदद्ध्यादिद मस्म्य ष्ठा चत्वारिꣳशत)

(देवा मनुष्या मादयद्ध्वं)

॥ हरिः ॐ ॥

द्वितीयकाण्डे चतुर्थः प्रश्नः समाप्तः

| अनुवाकाः | पञ्चशत्यः |
|---|---|
| १४ | ४८ |

ॐ